# अर्जुनस्य गर्वहरणम।

## अवबोधनम्।

**अ. पूर्णवाक्येन उत्तरं लिखत।**

*१. अर्जुन: **कुत्र** जगाम?

**उत्तर:** अर्जुन: **निबिडारण्यं** जगाम।

*२. अर्जुन: **किम्** ऐच्छत्?

**उत्तर:** अर्जुन: **मन:शान्तिम् अनुभवितुम्** ऐच्छत्।

*३. **किमर्थम्** अर्जुन: वृक्षशाखां छेत्तुं प्रारेभे?

**उत्तर: वने विहरन् चण्डातपेन तप्त: अर्जुन: वीजनार्थं** वृक्षशाखां छेत्तुं प्रारेभे।

४. शाखायां निबद्धे नीडे **के** सुप्ता:?

**उत्तर:** शाखायां निबद्धे नीडे **सूर्यखगस्य शावका:** सुप्ता:।

५. अर्जुनस्य हस्ते **क:** उपाविशत्?

**उत्तर:** अर्जुनस्य हस्ते **सूर्यखग:** उपाविशत्।

६. शावका: **कुत्र** सुप्ता:?

**उत्तर:** शावका: **शाखायां निबद्धे नीडे** सुप्ता:।

**ब. उचितपर्यायं लिखित्वा रिक्तस्थानपूर्तिं कुरुत।**

*१. ________ कष्टेन निर्मितमेतद् नीडं ________।

(महती/ महता) (मया / तेन)

**उत्तर: महता** कष्टेन निर्मितमेतद् नीडं **मया**।

*२. ________ अनुग्रहीतुम् ________ भवान्।

(माम् / अस्माकम्) (अर्हत: / अर्हति)

**उत्तर: माम्** अनुग्रहीतुम् **अर्हति** भवान्।

*३. ________ कातर: ________।

(मा / मम)(भवेत् /भव)

**उत्तर:** **मा** कातर: **भव**।

४. अर्जुन: ________ निबिडारण्यं ________।

(युद्धार्थं / विहारार्थं) (जगाम / जग्मु:)

**उत्तर:** अर्जुन:**विहारार्थं** निबिडारण्यं **जगाम**।

५. चण्डातपेन ________ स: वीजनार्थं वृक्षशाखां ________ प्रारेभे।

(तप्ता / तप्त:) (छेत्तुं / द्रष्टुं)

**उत्तर:** चण्डातपेन **तप्त:** स: वीजनार्थं वृक्षशाखां **छेत्तुं** प्रारेभे।

## क. क: कं वदति तद् लिखत।

१. न छेत्तव्या शाखासौ।

**उत्तर: सूर्यखग: अर्जुनं वदति।**

२. महता कष्टेन निर्मितमेतन्नीडं मया।

**उत्तर: सूर्यखग: अर्जुनं वदति।**

३. मामनुग्रहीतुमर्हति भवान्।

**उत्तर: सूर्यखग: अर्जुनं वदति।**

४. मा कातरो भव।

**उत्तर: अर्जुन: सूर्यखगं वदति।**

५. न पीडयामि त्वां तव शावकान् वा।

**उत्तर: अर्जुन: सूर्यखगं वदति।**

**ड. सत्यं वा असत्यं वा तद् लिखत।**

१. श्रेष्ठो धनुर्धारी अर्जुनः मृगयार्थं निबिडारण्यं जगाम।

उत्तरः **असत्यम्।**

२. अर्जुनः मनःशान्तिम् अनुभवितुम् ऐच्छत्।

उत्तरः **सत्यम्।**

३. सः वीजनार्थं वृक्षं छेत्तुं प्रारेभे।

उत्तरः **असत्यम्।**

४. सूर्यखगः अर्जुनं प्रार्थयामास, "न छेत्तव्या शाखासौ" इति।

उत्तरः **सत्यम्।**

## शब्दज्ञानम्।

**अ. पर्यायशब्दं लिखत ।**

| | | | |
|---|---|---|---|
| *१. | वनम्, काननम्, अटवी, विपिनम् | = | **अरण्यम्।** |
| *२. | शिशुः, पोतः | = | **शावकः।** |
| *३. | अधीरः, भीरूः, भीलुकः (भित्रा) | = | **कातरः।** |
| ४. | करः, पाणिः | = | **हस्तः।** |

५. विटप: = **शाखा।**

६. आकर्ण्य, निशम्य = **श्रुत्वा।**

**ब. गद्यांशे विपरितपदं चित्वा लिखत।**

१. कनिष्ठ: × **श्रेष्ठ:।**

२. विरलम्, अगाढम् × **निबिडम्।**

३. आगत्य × **गत्वा।**

४. जागरिता: × **सुप्ता:।**

५. धीर:, शूर:, वीर: × **कातर:।** (भित्रा)

**क. विशेषण-विशेष्य-अन्विति:।**

१. स्तम्भमेलनं कुरुत।

| | 'अ' गट | | 'ब' गट |
|---|---|---|---|
| i. | श्रेष्ठ: | अ. | कष्टेन |
| ii. | छेत्तव्या | ब. | धनुर्धारी |
| iii. | निबद्धे | क. | अर्जुन: |
| iv. | महता | ड. | शाखा |
| v. | करुणार्द्रहृदय: | इ. | नीडे |

**उत्तर: i. श्रेष्ठ: धनुर्धारी।**

**ii. छेत्तव्या शाखा।**

**iii. निबद्धे नीडे।**

**iv. महता कष्टेन।**

**v. करुणार्द्रहृदय: अर्जुन:।**

ङ. **धातुसाधित-अव्ययानां चयनम् / विभक्त्यन्तपदानां चयनम्।**

१. गद्यांशे आगते द्वे पूर्वकालवाचक-धातुसाधित-त्वान्त-अव्यये लिखत।

उत्तर: i. **गत्वा।**

ii. **श्रुत्वा।**

२. गद्यांशे आगते द्वे पूर्वकालवाचक-धातुसाधित-ल्यबन्त-अव्यये लिखत।

उत्तर: i. **आगत्य।**

ii. **उपविश्य।**

३. गद्यांशे आगते द्वे हेत्वर्थक-धातुसाधित-तुमन्त-अव्यये लिखत।

उत्तर: i. **अनुभवितुम्।**

ii. **छेत्तुम्।**

४. गद्यांशे पञ्चमी-विभक्त्यन्तपदे चित्वा लिखत।

उत्तर: i. **जनसमाकुलात्।**

ii. **नगरात्।**

## अवबोधनम्।

अ. **पूर्णवाक्येन उत्तरं लिखत।**

१. अर्जुनस्य हस्तस्योपरि वृक्षात् **का:** अपतन्?

उत्तर: अर्जुनस्य हस्तस्योपरि वृक्षात् **काश्चन पिपीलिका:** अपतन्।

२. पिपीलिका: **कुत:** अर्जुनस्य हस्तस्योपरि अपतन्?

उत्तर: पिपीलिका: **वृक्षात्** अर्जुनस्य हस्तस्योपरि अपतन्।

३. पिपीलिकानां निलया: **कीदृशा:**?

उत्तर: पिपीलिकानां निलया: **पर्णबद्धा: कन्दुकाकारा:**।

४. **के** निलयम् आश्रिता:?

उत्तर: **पिपीलिकानां शावका: तासां राज्ञी सेवका: च** निलयम् आश्रिता:।

**ब. उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत।**

१. शाखां छेत्तुं प्रवृत्तस्य अर्जुनस्य _______ उपरि काश्चन _______ वृक्षादपतन्।

(हस्तस्य / हस्तात्) (सूर्यखगाः / पिपीलिकाः)

**उत्तर:** शाखां छेत्तुं प्रवृत्तस्य अर्जुनस्य **हस्तस्य** उपरि काश्चन **पिपीलिकाः** वृक्षादपतन्।

२. शाखासु _______ कन्दुकाकाराः _______ निलयाः।

(पर्णबद्धाः / तृणबद्धाः) (सूर्यखगानां / पिपीलिकानां)

**उत्तर:** शाखासु **पर्णबद्धाः** कन्दुकाकाराः **पिपीलिकानां** निलयाः।

३. पिपीलिकानाम् _______ आकर्ण्य अर्जुनः तस्मात् स्थानात् _______।

(गीतम् / अभ्यर्थनाम्) (प्रातिष्ठत / आगच्छत्)

**उत्तर:** पिपीलिकानाम् **अभ्यर्थनाम्** आकर्ण्य अर्जुनः तस्मात् स्थानात् **प्रातिष्ठत**।

४. _______ जन्तवः एते _______ पिपीलिकाः।

(क्षुद्राः / महान्तः) (सूर्यखगाः / खगाः)

**उत्तरः क्षुद्राः** जन्तवः एते **सूर्यखगाः** पिपीलिकाः।

**क. कः कं वदति?**

१. एतासु शाखासु पर्णबद्धाः कन्दुकाकाराः अस्माकं निलयाः।

**उत्तरः पिपीलिकाः अर्जुनं वदन्ति।**

२. तदाश्रिताः अस्माकं शावकाः अस्माकं राज्ञी सेवकाश्च।

**उत्तरः पिपीलिकाः अर्जुनं वदन्ति।**

३. शाखाच्छेदनेन वयं सर्वे निराश्रयाः भवेम।

**उत्तरः पिपीलिकाः अर्जुनं वदन्ति।**

४. अस्मान् उपकरोतु भवान्।

**उत्तरः पिपीलिकाः अर्जुनं वदन्ति।**

५. आपत्काले त्वां ध्रुवं सहायं करिष्यामः।

**उत्तरः पिपीलिकाः अर्जुनं वदन्ति।**

६. क्षुद्राः जन्तवः एते सूर्यखगाः पिपीलिकाः।

**उत्तरः अर्जुनः आत्मानं वदति।**

७. सूर्यखगाः पिपीलिकाः कथं मम साहाय्यकारिणः भविष्यन्ति।

उत्तरः **अर्जुनः आत्मानं वदति।**

८. अहं तु शक्तिमान्, शस्त्रधारी, निपुणयोद्धा च।

उत्तरः **अर्जुनः आत्मानं वदति।**

**ड. वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत।**

१. अर्जुनस्य हस्तस्योपरि काश्चन चटकाः वृक्षादपतन्।

उत्तरः **असत्यम्।**

२. वृक्षस्य शाखासु पिपीलिकानां नीडानि आसन्।

उत्तरः **असत्यम्।**

३. कन्दुकाकारान् निलयान् आश्रिताः पिपीलिकानां शावकाः।

उत्तरः **सत्यम्।**

४. पिपीलिकाः अर्जुनम् आहारार्थं प्रार्थयन्त।

उत्तरः **असत्यम्।**

५. पिपीलिकाः अर्जुनाय आपत्काले सहायं प्रत्यशृण्वन्।

उत्तरः **सत्यम्। (प्रत्यशृण्वन् = आश्वासन देणे)**

६. अर्जुनः आत्मानं शक्तिमान् निपुणयोद्धा अमन्यत।

उत्तरः **सत्यम्।**

## माध्यमभाषया स्वमतप्रकटनम्।

**[टीपः पुढील प्रश्न गद्यांशः ३ मध्ये देखील विचारला जाऊ शकतो.]**

१. 'क्षुद्राः जन्तवः अपि मानवस्य साहाय्यकारिणः भवन्ति वा न वा' इति विषये स्वमतं माध्यमभाषया लिखत।

उत्तरः 'अर्जुनस्य गर्वहरणम्।' ही महाभारतावर आधारित एक काल्पनिक कथा आहे. निसर्गातील एकही सजीव निरुपयोगी नाही, ही वस्तुस्थिती या पाठातून स्पष्ट होते. अतिशय क्षुद्र जीवही आपल्या जीवनात महत्त्वाची भूमिका निभावू शकतात.

ही एक रूपक कथा आहे. सजीवांचे एकमेकांवरचे अवलंबित्व या कथेतून दिसून येते. या कथेत दोन सजीवांचे उदाहरण देण्यात आले आहे, पण सर्वच सजीव महत्त्वाचे असतात. मनुष्य हा जरी सर्वांत बुद्धिमान आणि विकसित प्राणी असला, तरी तोदेखील इतर सजीवांवर अवलंबून असतो. हे सजीव प्रत्यक्ष किंवा अप्रत्यक्षरीत्या आपल्याला साहाय्य करतात. गांडूळ हा जीव जमीन भुसभुशीत करत असल्यामुळे त्याला 'शेतकऱ्याचा मित्र' असे म्हणतात. प्राणी आणि वनस्पती यांपासून अनुक्रमे दूध,दुग्धजन्य पदार्थ आणि इतर अन्नपदार्थ मिळतात. जेव्हा परिसंस्थेतील प्रत्येक घटक व्यवस्थित व एकमेकांशी समतोल साधत काम करतो, तेव्हाच संपूर्ण परिसंस्था व्यवस्थित काम करू शकते. एखाद्या घटकाचा समतोल ढळला, तरी संपूर्ण परिसंस्थेचा तोल ढळतो.

म्हणूनच, आपण या निष्कर्षाप्रत येतो, की कोणताही सजीव आकाराने कितीही सूक्ष्म असला, तरीही इतर सजीवांच्या अस्तित्वासाठी तो साहाय्यकारी ठरतोच.

## पृथक्करणम्।

१. घटनाक्रमानुसारं संयोजयत।

i. पिपीलिकानां हस्तस्योपरि पतनम्।

ii. अपरस्य वृक्षशाखायाः छेदनम्।

iii. स्वस्य सामर्थ्यविषये गर्वः।

iv. पिपीलिकानाम् अभ्यर्थना सहायस्य वचनं च।

उत्तरः **i. अपरस्य वृक्षशाखायाः छेदनम्।**

**ii. पिपीलिकानां हस्तस्योपरि पतनम्।**

**iii. पिपीलिकानाम् अभ्यर्थना सहायस्य वचनं च।**

**iv. स्वस्य सामर्थ्यविषये गर्वः।**

## शब्दज्ञानम्।

### अ. पर्यायशब्दं चिनुत।

| | | | |
|---|---|---|---|
| *१. | विपत्तिः, आपद्, विपद्, व्यसनम् (संकट) | = | **आपत्तिः।** |
| *२. | निवासः, आवासः, आलयः | = | **निलयः।** |
| ३. | करः, पाणिः | = | **हस्तः।** |
| ४. | पिपिली, उपदीका, वल्मी, पीलकः (मुंगी) | = | **पिपीलिका।** |
| ५. | दासः, भृत्यः, विधेयः | = | **सेवकः।** |
| ६. | निश्चितम्, नियतम्, कामम्, अवश्यम् | = | **ध्रुवम्।** |
| ७. | प्रार्थना, आवेदनम्, विज्ञापना, याचना | = | **अभ्यर्थना।** |
| ८. | तुच्छः, नगण्यः, लघुः | = | **क्षुद्रः।** |
| ९. | पशुः, प्राणी, सत्त्वम्, भूतम् | = | **जन्तुः।** |
| १०. | बलवान्, वीर्यवान्, समर्थः | = | **शक्तिमान्।** |
| ११. | कुशलयोद्धा, प्रवीणयोद्धा | = | **निपुणयोद्धा।** |

### ब. विलोमपदं चिनुत।

| | | | |
|---|---|---|---|
| १. | सेवकः, दासः, भृत्यः | × | **स्वामी।** |
| २. | अपकरोतु | × | **उपकरोतु।** |
| ३. | सम्पत्काले | × | **आपत्काले।** |
| ४. | महान् | × | **क्षुद्रः।** |
| ५. | दुर्बलः, अबलः | × | **शक्तिमान्।** |

### क. विशेषण-विशेष्य-अन्वितिः।

१. विशेषण-विशेष्यानां मेलनं कुरुत।

| | विशेषणम् | | विशेष्यम् |
|---|---|---|---|
| i. | पर्णबद्धाः | अ. | जन्तवः |
| ii. | क्षुद्राः | ब. | अर्जुनः |
| iii. | निपुणयोद्धा | क. | निलयाः |

उत्तर: i. **पर्णबद्धा: निलया:।**

ii. **क्षुद्रा: जन्तव:।**

iii. **निपुणयोद्धा अर्जुन:।**

२. गद्यांशे आगते निलयस्य द्वे विशेषणे लिखत।

उत्तर: i. **पर्णबद्धा:।**

ii. **कन्दुकाकारा:।**

३. गद्यांशे आगतानि अर्जुनस्य विशेषणानि चित्वा लिखत।

उत्तर: i. **शक्तिमान्।** ii. **शस्त्रधारी।**

iii. **निपुणयोद्धा।**

**ड. धातुसाधित-अव्ययानां चयनम् / विभक्त्यन्तपदानां चयनम्।**

१. गद्यांशे हेत्वर्थक-धातुसाधित-तुमन्त-अव्ययं चिनुत।

उत्तर: i. **छेत्तुम्।**

२. गद्यांशे आगतं पूर्वकालवाचक-धातुसाधित-ल्यबन्त-अव्ययं लिखत।

उत्तर: i. **आकर्ण्य।**

३. I. गद्यांशे सप्तमी-विभक्त्यन्तपदानि चित्वा लिखत।

उत्तर: i. **एतासु।**

ii. **शाखासु।**

iii. **आपत्काले।**

II. गद्यांशे पञ्चमी-विभक्त्यन्तपदानि चित्वा लिखत।

उत्तर: i. **वृक्षात्।**

ii. **तस्मात्।**

iii. **स्थानात्।**

## अवबोधनम्।

**अ. पूर्णवाक्येन उत्तरं लिखत।**

*१. अज्ञातवासकाले सूर्यखगः अर्जुनं **कुत्र** नीतवान्?

**उत्तरः** अज्ञातवासकाले सूर्यखगः अर्जुनं **कस्यापि विशाल-वृक्षस्य समीपं** नीतवान्।

*२. अर्जुनः अदृश्यः **कथम**भवत्?

**उत्तरः अर्जुनस्य सर्वाङ्गं पिपीलिकाभिः तथा आच्छादितं यथा सः** अदृश्य इव अभवत्।

३. अज्ञातवासकाले **कीदृशः** अर्जुनः तमेव वनप्रदेशं प्राविशत्?

**उत्तरः** अज्ञातवासकाले **शस्त्रहीनः परिव्राजकवेषधारी** अर्जुनः तमेव वनप्रदेशं प्राविशत्।

४. अर्जुनः **किं** दृष्टवान्?

**उत्तरः** अर्जुनः **कांश्चन गुप्तचरान् तं प्रति एव आगच्छतः** दृष्टवान्।

५. अर्जुनस्य पुरतः **कः** उपस्थितः?

**उत्तरः** अर्जुनस्य पुरतः **सूर्यखगः** उपस्थितः।

६. वृक्षे **किम्** आसीत्?

**उत्तरः** वृक्षे **महान् कोटरः** आसीत्।

७. कोटरे प्रविश्य अर्जुनेन **किं** कृतम्?

**उत्तर:** कोटरं प्रविश्य अर्जुनः **तत्रैव निभृतः स्थितः**।

**ब. उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत।**

१. अज्ञातवासकाले ________ अर्जुनः तमेव ________ प्राविशत्।

(शस्त्रधारी / शस्त्रहीनः) (वनप्रदेशं / उद्यानं)

**उत्तर:** अज्ञातवासकाले **शस्त्रहीनः** अर्जुनः तमेव **वनप्रदेशं** प्राविशत्।

२. कांश्चन गुप्तचरान् ________ प्रति एवागच्छतः स ________। (तस्य / तं) (दृष्टवान् / श्रुतवान्)

**उत्तर:** कांश्चन गुप्तचरान् **तं** प्रति एवागच्छतः स **दृष्टवान्**।

३. अज्ञातकाले ________ कोऽपि मामभिजानीयात् ________ महापत्तिः उद्भवेत्।

(यथा / यदि) (तर्हि / तावत्)

**उत्तर:** अज्ञातकाले **यदि** कोऽपि मामभिजानीयात् **तर्हि** महापत्तिः उद्भवेत्।

४. ________ पुरतः सूर्यखगः ________।

(अर्जुनात् / अर्जुनस्य) (उपस्थितः / धावितः)

**उत्तर:** **अर्जुनस्य** पुरतः सूर्यखगः **उपस्थितः**।

५. अर्जुनम् _______ तत्रागता: गुप्तचरा: तं _______ असमर्था:।

(अन्विष्यन्त: / सन्तुष्यन्त:) (ज्ञातुम् /पातुम्)

उत्तर: अर्जुनम् **अन्विष्यन्त:** तत्रागता: गुप्तचरा: तं **ज्ञातुम्** असमर्था:।

६. _______ अर्जुन: _______ प्रति कृतज्ञतां प्रकटितवान्।

(सङ्कटबद्ध: / सङ्कटमुक्त:) (तयो: / तान्)

उत्तर: **सङ्कटमुक्त:** अर्जुन: **तान्** प्रति कृतज्ञतां प्रकटितवान्।

**क. क: कं वदति?**

१. "किं करणीयमधुना?"

**उत्तर: अर्जुन: आत्मानं वदति।**

२. "यदि कोऽपि मामभिजानीयात् तर्हि महापत्ति: उद्भवेत्।"

**उत्तर: अर्जुन: आत्मानं वदति।**

**ड. वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत।**

१. अज्ञातवासकाले शस्त्रधारी अर्जुन: तमेव वनप्रदेशं प्राविशत्।

**उत्तर: असत्यम्।**

२. निबिडारण्ये पर्यटति अर्जुने कुतश्चित् मनुजशब्द इव श्रुतिपथमागत:।

**उत्तर: सत्यम्।**

३. कांश्चन सैनिकान् आगच्छत: स: दृष्टवान्।

**उत्तर: असत्यम्।**

४. अर्जुनस्य पुरत: पिपीलिका: तत्र उपस्थिता:।

**उत्तर: असत्यम्।**

५. सूर्यखगेन स्वरवेण मार्गं निर्दिष्टम्।

**उत्तर: सत्यम्।**

६. गुहां प्रविश्य अर्जुन: निभृत: स्थित:।

**उत्तर: असत्यम्।**

७. अर्जुन: अदृश्य: इव अभवत्।

**उत्तर: सत्यम्।**

८. गुप्तचरा: अर्जुनं ज्ञातुं समर्था:।

**उत्तर: असत्यम्।**

९. अर्जुन: सूर्यखगस्य पिपीलिकानां च वचनं स्मारं स्मारं कृतज्ञतां प्रकटितवान्।

**उत्तर: सत्यम्।**

## माध्यमभाषया स्वमतप्रकटनम्।

**[टीप: गद्यांश: २ मध्ये दिलेला प्रश्न या गद्यांशावर देखील विचारला जाऊ शकतो.]**

## पृथक्करणम्।

१. घटनाक्रमानुसारं संयोजयत।

i. पिपीलिकानां साहाय्यम्।

ii. सूर्यखगस्य दिशादर्शनम्।

iii. गुप्तचराणाम् आगमनम्।

iv. अर्जुनस्य कृतज्ञताप्रकटनम्।

उत्तर: **i. गुप्तचराणाम् आगमनम्।**

**ii. सूर्यखगस्य दिशादर्शनम्।**

**iiii. पिपीलिकानां साहाय्यम्।**

**iv. अर्जुनस्य कृतज्ञताप्रकटनम्।**

२. अधोदत्ता: घटना: क्रमानुसारं योजयत।

i. गुप्तचराणां दर्शनम्।

ii. पिपीलिकानां साहाय्येन सङ्कटमुक्तिः।

iii. अज्ञातकाले वनप्रवेशः।

iv. सूर्यखगस्य साहाय्येन कोटरे प्रवेशः।

उत्तर: **i. अज्ञातकाले वनप्रवेशः।**

**ii. गुप्तचराणां दर्शनम्।**

**iiii. सूर्यखगस्य साहाय्येन कोटरे प्रवेशः।**

**iv. पिपीलिकानां साहाय्येन सङ्कटमुक्तिः।**

## शब्दज्ञानम्।

### अ. पर्यायशब्दं चिनुत।

१. कालः, वेला = **समयः।**

२. संन्यासी, श्रमणः = **परिव्राजकः।**

३. चारः, गूढपुरुषः (गुप्तहेर) = **गुप्तचरः।**

४. समीपे, निकटे, सविधे, निकषा = **समीपम्।**

५. भाषणम्, वाक् = **वचनम्।**

### ब. गद्यांशे विलोमशब्दं चित्वा लिखत।

१. शस्त्रधारी × **शस्त्रहीनः।**

२. दूरे, दूरम् × **समीपम्।**

३. लघुः, क्षुद्रः × **महान्।**

४. अनुपस्थितः × **उपस्थितः।**

५. अनाच्छादितम् × **आच्छादितम्।**

६. दृश्यः × **अदृश्यः।**

७. गताः × **आगताः।**

८. समर्थाः × **असमर्थाः।**

९. कृतघ्नता × **कृतज्ञता।**

## क. विशेषण-विशेष्य-अन्विति:।

१. स्तम्भमेलनं कुरुत।

| | विशेषणम् | | विशेष्यम् |
|---|---|---|---|
| i. | परिव्राजकवेषधारी | अ. | कोटर: |
| ii. | महान् | ब. | गुप्तचरा: |
| iii. | असमर्था: | क. | अर्जुन: |

**उत्तर: i. परिव्राजकवेषधारी अर्जुन:।**

**ii. महान् कोटर:।**

**iii. असमर्था: गुप्तचरा:।**

२. गद्यांशे अर्जुनस्य कृते प्रयुक्तानि विशेषणानि लिखत।

**उत्तर: i. शस्त्रहीन:।**

**ii. परिव्राजकवेषधारी।**

**iii. निभृत:।**

**iv. सङ्कटमुक्त:।**

## ड. धातुसाधित-अव्ययानां चयनम् / विभक्त्यन्तपदानां चयनम्।

१. गद्यांशे आगते द्वे धातुसाधित-ल्यबन्त-अव्यये लिखत।

**उत्तर: i. निर्दिश्य।**

**ii. प्रविश्य।**

२. गद्यांशे आगतं हेत्वर्थक-धातुसाधित-तुमन्त-अव्ययं चित्वा लिखत।

**उत्तर: i. ज्ञातुम्।**

३. गद्यांशे षष्ठी-विभक्त्यन्तपदानि चित्वा लिखत।

**उत्तर: i. तस्य। ii. कस्य।**

**iii. विशालवृक्षस्य। iv. सूर्यखगस्य।**

**v. पिपीलिकानाम्।**

## कृतिपत्रिकाया: तृतीय: विभाग: - व्याकरणम्।

### सन्धय:।

| | | | |
|---|---|---|---|
| *१. | जनसमाकुलान्नग-राद्दूरम् | = | **जनसमाकुलात् + नगरात् + दूरम्।** |
| *२. | अचिन्तयच्च | = | **अचिन्तयत् + च।** |
| *३. | दीर्घसमयोऽतीत: | = | **दीर्घसमय: + अतीत:।** |
| *४. | पुनरेकवारम् | = | **पुन:+ एकवारम्।** |
| ५. | मन:शान्तिमनुभवि-तुमैच्छत् | = | **मन:शान्तिम् + अनुभवितुम् + ऐच्छत्।** |
| ६. | तत्रागत्य | = | **तत्र + आगत्य।** |
| ७. | कोऽपि | = | **क: + अपि।** |
| ८. | शाखासौ | = | **शाखा + असौ।** |
| ९. | शाखायामस्याम् | = | **शाखायाम् + अस्याम्।** |
| १०. | निर्मितमेतन्नीडम् | = | **निर्मितम् + एतत् + नीडम्।** |
| ११. | मामनुग्रहीतुमर्हति | = | **माम् + अनुग्रहीतुम् + अर्हति।** |
| १२. | तमुवाच | = | **तम् + उवाच।** |
| १३. | हस्तस्योपरि | = | **हस्तस्य + उपरि।** |
| १४. | काश्चन | = | **का: + चन।** |
| १५. | पिपीलिकानामभ्यर्थना-मकर्ण्य | = | **पिपीलिकानाम् + अभ्यर्थनाम् +आकर्ण्य।** |
| १६. | प्रातिष्ठताचिन्तयच्च | = | **प्रातिष्ठत + अचिन्तयत् + च।** |
| १७. | एवागच्छत: | = | **एव + आगच्छत:।** |
| १८. | मामभिजानीयात् | = | **माम् + अभिजानीयात्।** |
| १९. | तत्रोपस्थित: | = | **तत्र + उपस्थित:।** |
| २०. | निर्दिश्यार्जुन: | = | **निर्दिश्य + अर्जुन:।** |
| २१. | पिपीलिकाभिस्तस्य | = | **पिपीलिकाभि: + तस्य।** |
| २२. | अर्जुनमन्विष्यन्त: | = | **अर्जुनम् + अन्विष्यन्त:।** |
| २३. | सङ्कटमुक्तोऽर्जुन: | = | **सङ्कटमुक्त: + अर्जुन:।** |

### पदपरिचय:।

**धातव:।**

**वर्तमानकाल:।**

| क्र. | रूपम् | मूलधातु: | गण:, पदम् | काल: / अर्थ: | पुरुष: | वचनम् |
|---|---|---|---|---|---|---|
| १. | अर्हति | अर्ह् | १ प.प. | वर्तमानकाल: | तृतीय: | एकवचनम् |
| २. | पीडयामि | पीड् | १० उ.प. येथे प.प. | वर्तमानकाल: | प्रथम: | एकवचनम् |
| ३. | पर्यटति | परि + अट् | १ प.प. | वर्तमानकाल: | तृतीय: | एकवचनम् |

### प्रथम – भूतकालः।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | कालः / अर्थः | पुरुषः | वचनम् |
|---|---|---|---|---|---|---|
| *४. | प्रातिष्ठत | प्र + स्था → तिष्ठ् | १ आ.प. (**टीप:** स्था १ प.प. पण येथे 'प्र' उपसर्गामुळे १ आ. प.) | प्रथमभूतकाल: | तृतीय: | एकवचनम् |
| *५. | ऐच्छत् | इष्-इच्छ् | ६ प.प. | प्रथमभूतकाल: | तृतीय: | एकवचनम् |
| ६. | अपतन् | पत् | १ प.प. | प्रथमभूतकाल: | तृतीय: | बहुवचनम् |
| ७. | प्रार्थयन्त | प्र + अर्थ् | १० उ.प. येथे आ.प. | प्रथमभूतकाल: | तृतीय: | बहुवचनम् |
| ८. | अचिन्तयत् | चिन्त् | १० उ.प. येथे प.प. | प्रथमभूतकाल: | तृतीय: | एकवचनम् |
| ९. | प्राविशत् | प्र + विश् | ६ प.प. | प्रथमभूतकाल: | तृतीय: | एकवचनम् |
| १०. | व्यचिन्तयत् | वि + चिन्त् | १० उ.प. येथे प.प. | प्रथमभूतकाल: | तृतीय: | एकवचनम् |

### आज्ञार्थः।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | कालः / अर्थः | पुरुषः | वचनम् |
|---|---|---|---|---|---|---|
| *११. | भव | भू – भव् | १ प.प. | आज्ञार्थ: | द्वितीय: | एकवचनम् |
| १२. | उपकरोतु | उप + कृ | ८ उ.प. येथे प.प. | आज्ञार्थ: | तृतीय: | एकवचनम् |

### विध्यर्थः।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | कालः / अर्थः | पुरुषः | वचनम् |
|---|---|---|---|---|---|---|
| *१३. | अभिजानीयात् | अभि + ज्ञा | ९ प.प. येथे प.प. | विध्यर्थ: | तृतीय: | एकवचनम् |
| १४. | भवेम | भू – भव् | १ प.प. | विध्यर्थ: | प्रथम: | बहुवचनम् |
| १५. | उद्भवेत् | उद् + भू → भव् | १ प.प. | विध्यर्थ: | तृतीय: | एकवचनम् |

### स्य / द्वितीय – भविष्यत्काल:।

| क्र. | रूपम् | मूलधातु: | गण:, पदम् | काल: / अर्थ: | पुरुष: | वचनम् |
|---|---|---|---|---|---|---|
| *१६. | भविष्यन्ति | भू → भव् | १ प.प. | स्य-भविष्यत्काल: | तृतीय: | बहुवचनम् |
| १७. | करिष्याम: | कृ | ८ उ.प. येथे प.प. | स्य-भविष्यत्काल: | प्रथम: | बहुवचनम् |

### परोक्ष – भूतकाल:।

| क्र. | रूपम् | मूलधातु: | गण:, पदम् | काल: / अर्थ: | पुरुष: | वचनम् |
|---|---|---|---|---|---|---|
| *१८. | जगाम | गम् – गच्छ् | १ प.प. | अभ्यस्त-परोक्षभूतकाल: | तृतीय: | एकवचनम् |
| *१९. | प्रारेभे | प्र + आ + रभ् | १ आ.प. | अभ्यस्त-परोक्षभूतकाल: | तृतीय: | एकवचनम् |
| *२०. | उवाच | वच्<br>ब्रू | २ प.प.,<br>२ उ.प. येथे प.प. | अभ्यस्त-परोक्षभूतकाल: | तृतीय: | एकवचनम् |
| *२१. | प्रार्थयामास | प्र + अर्थ् | १० उ.प. | आमन्त-परोक्ष-भूतकाल: | तृतीय: | एकवचनम् |

### पूर्वकालवाचक – धातुसाधित – अव्ययानि।

| क्र. | रूपम् | मूलधातु: | गण:, पदम् | पूर्वकालवाचकम् |
|---|---|---|---|---|
| २२. | गत्वा | गम्-गच्छ् | १ प.प. | त्वान्त-अव्ययम्। |
| २३. | श्रुत्वा | श्रु-शृ | ५ प.प. | त्वान्त-अव्ययम्। |
| २४. | उपविश्य | उप + विश् | ६ प.प. | त्वान्त-अव्ययम्। |
| २५. | आगत्य | आ + गम् – गच्छ् | १ प.प. | ल्यबन्त-अव्ययम्। |
| २६. | आकर्ण्य | आ + कर्ण् | १० प.प. | ल्यबन्त-अव्ययम्। |
| २७. | निर्दिश्य | निर् + दिश् | ६ उ.प. | ल्यबन्त-अव्ययम्। |
| २८. | प्रविश्य | प्र + विश् | ६ प.प. | ल्यबन्त-अव्ययम्। |

### हेत्वर्थक – धातुसाधित – अव्ययानि।

| क्र. | रूपम् | मूलधातु: | गण:, पदम् | हेत्वर्थक-धातुसाधितम् |
|---|---|---|---|---|
| *२९. | छेत्तुम् | छिद् | ७ उ.प. | तुमन्त-अव्ययम्। |
| ३०. | अनुभवितुम् | अनु + भू – भव् | १ प.प. | तुमन्त-अव्ययम्। |
| ३१. | अनुग्रहीतुम् | अनु + ग्रह् | ९ उ.प. | तुमन्त-अव्ययम्। |
| ३२. | ज्ञातुम् | ज्ञा | ९ उ.प. | तुमन्त-अव्ययम्। |

### नामधातु:।

| क्र. | रूपम् | प्रातिपदिकम् | भूतकालवाचकम् | लिङ्गम् | विभक्ति: | वचनम् |
|---|---|---|---|---|---|---|
| ३३. | प्रकटितवान् | प्रकट | कर्मणि-भू-धा.वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |

### कर्मणि – विध्यर्थक – धातुसाधित – विशेषणानि।

| क्र. | रूपम् | मूलधातु: | गण:, पदम् | विध्यर्थकम् | लिङ्गम् | विभक्ति: | वचनम् |
|---|---|---|---|---|---|---|---|
| ३४. | छेत्तव्या | छिद् | ७ उ.प. | कर्मणि-वि-धा-वि. | स्त्रीलिङ्गम् | प्रथमा | एकवचनम् |

## कर्मणि – भूतकालवाचक – धातुसाधित – विशेषणानि।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | भूतकालवाचकम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|---|
| *३५. | आच्छादितम् | आ + छद् → छाद् | १० उ.प. | कर्मणि-भू-धा-वि. | पुंलिङ्गम् | द्वितीया | एकवचनम् |
| | | | | | नपुंसकलिङ्गम् | प्रथमा,द्वितीया | एकवचनम् |
| ३६. | निबद्धे | नि + बन्ध् | ९ प.प. | कर्मणि-भू-धा-वि. | पुंलिङ्गम् | सप्तमी | एकवचनम् |
| | | | | | नपुंसकलिङ्गम् | प्रथमा,द्वितीया, सम्बोधनम् आणि सप्तमी | द्विवचनम् एकवचनम् |
| ३७. | निर्मितम् | निर् + मा | २ प.प. ३ आ.प. | कर्मणि-भू-धा-वि. | पुंलिङ्गम् | द्वितीया | एकवचनम् |
| | | | | | नपुंसकलिङ्गम् | प्रथमा,द्वितीया | एकवचनम् |
| ३८. | नीतः | नी → नय् | १ उ.प. | कर्मणि-भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |

## कर्तरि – भूतकालवाचक – धातुसाधित – विशेषणानि।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | भूतकालवाचकम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|---|
| ३९. | तप्तः | तप् | १ प.प. | कर्तरि-भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| ४०. | सुप्ताः | स्वप् | २ प.प. (अकर्मक धातू) | कर्तरि -भू-धा-वि. | पुंलिङ्गम् | प्रथमा, सम्बोधनम् | बहुवचनम् |
| | | | | | स्त्रीलिङ्गम् | प्रथमा, द्वितीया, सम्बोधनम् | बहुवचनम् |
| ४१. | प्रवृत्तस्य | प्र + वृत् → वर्त् | १ आ.प. (अकर्मक धातू) | कर्तरि -भू-धा-वि. | पुंलिङ्गम्, नपुंसकलिङ्गम् | षष्ठी | एकवचनम् |
| ४२. | अतीतः | अति + इ | २ प.प. (अकर्मक धातू) | कर्तरि -भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ४३. | दृष्टवान् | दृश्-पश्य् | १ प.प. | कर्तरि -भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| ४४. | उपस्थित: | उप + स्था → तिष्ठ् | १ प.प. (अकर्मक धातू) | कर्तरि -भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| ४५. | प्रतिनिवृत्ता: | प्रति + नि + वृत् → वर्त् | १ आ.प. (अकर्मक धातू) | कर्तरि -भू-धा-वि. | पुंलिङ्गम् | प्रथमा, सम्बोधनम् | बहुवचनम् |
| | | | | | स्त्रीलिङ्गम् | प्रथमा, द्वितीया, सम्बोधनम् | बहुवचनम् |

## वर्तमानकालवाचक – धातुसाधित – विशेषणानि।

| क्र. | रूपम् | मूलधातु: | गण:, पदम् | वर्तमानकालवाचकम् | लिङ्गम् | विभक्ति: | वचनम् |
|---|---|---|---|---|---|---|---|
| *४६. | अन्विष्यन्त: | अनु + इष् | ४ प.प. | कर्तरि-व-का-धा-वि. | पुंलिङ्गम् | प्रथमा, सम्बोधनम् | बहुवचनम् |
| *४७. | विहरन् | वि + हृ → हर् | १ उ.प. | कर्तरि-व-का-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| ४८. | पर्यटति | परि + अट् | १ प.प. | कर्तरि-व-का-धा-वि. | पुंलिङ्गम् नपुंसकलिङ्गम् | सप्तमी | एकवचनम् |
| ४९. | आगच्छत: | आ + गम् → गच्छ् | १ प.प. | कर्तरि-व-का-धा-वि. | पुंलिङ्गम् | द्वितीया<br>पञ्चमी, षष्ठी | बहुवचनम्<br>एकवचनम् |

## नामानि।

| क्र. | रूपम् | प्रातिपदिकम् | प्रकार: | लिङ्गम् | विभक्ति: | वचनम् |
|---|---|---|---|---|---|---|
| ५०. | शाखायाम् | शाखा | आकारान्तम् | स्त्रीलिङ्गम् | सप्तमी | एकवचनम् |
| ५१. | महता | महत् | तकारान्तम् | पुंलिङ्गम् , नपुंसकलिङ्गम् | तृतीया | एकवचनम् |
| ५२. | शावकान् | शावक | अकारान्तम् | पुंलिङ्गम् | द्वितीया | बहुवचनम् |
| ५३. | स्वामिन् | स्वामिन् | इन्नन्तम् | पुंलिङ्गम् | सम्बोधनम् | एकवचनम् |
| ५४. | अभ्यर्थनाम् | अभ्यर्थना | आकारान्तम् | स्त्रीलिङ्गम् | द्वितीया | एकवचनम् |
| ५५. | जन्तव: | जन्तु | उकारान्तम् | पुंलिङ्गम् | प्रथमा, सम्बोधनम् | बहुवचनम् |
| ५६. | शक्तिमान् | शक्तिमत् | 'मत्' प्रत्ययान्तम् | पुंलिङ्गम् | प्रथमा | एकवचनम् |

## सर्वनामानि।

| क्र. | रूपम् | प्रातिपदिकम् | पुरुषवाचक: | लिङ्गम् | विभक्ति: | वचनम् |
|---|---|---|---|---|---|---|
| *५७. | अस्याम् | इदम् | तृतीयपुरुष: | स्त्रीलिङगम् | संप्तमी | एकवचनम् |
| *५८. | असौ | अदस् | तृतीयपुरुष: | पुंलिङ्गम् , स्त्रीलिङ्गम् | प्रथमा | एकवचनम् |
| ५९. | मया | अस्मद् | प्रथमपुरुष: | त्रिषु लिङ्गेषु समानम् | तृतीया | एकवचनम् |
| ६०. | त्वाम् | युष्मद् | द्वितीयपुरुष: | त्रिषु लिङ्गेषु समानम् | द्वितीया | एकवचनम् |

**समासपरिचयः।**

विभक्ति – तत्पुरुषः।

| क्र. | समस्तपदम् | विग्रहः | विभक्तिः | समासनाम |
|---|---|---|---|---|
| *१. | शस्त्रहीनः | शस्त्रैः हीनः। (शस्त्राशिवाय) | – | तृतीया-तत्पुरुषः। |
| *२. | विहारार्थम् | विहाराय इदम्। (विहारासाठी) | – | चतुर्थी-तत्पुरुषः। |
| *३. | सङ्कटमुक्तः | सङ्कटात् मुक्तः। (संकटांपासून मुक्त) | – | पञ्चमी-तत्पुरुषः। |
| *४. | वृक्षशाखा | वृक्षस्य शाखा। (झाडाची फांदी) | – | षष्ठी-तत्पुरुषः। |
| ५. | करुणार्द्रहृदयः | i. करुणया आर्द्रम्। करुणार्द्रम्। (करुणेने ओथंबलेला)<br>ii. करुणार्द्रं हृदयं यस्य सः। (ज्याचे हृदय करुणेने भरलेले आहे असा तो) | –<br>– | तृतीया-तत्पुरुषः।<br>समानाधिकरण-बहुव्रीहिः। |
| ६. | पर्णबद्धानि | पर्णैः बद्धानि। (पानांनी बांधलेले ) | – | तृतीया-तत्पुरुषः। |
| ७. | वीजनार्थम् | वीजनाय इदम्। (वारा घेण्यासाठी) | – | चतुर्थी-तत्पुरुषः। |
| ८. | मनःशान्तिम् | मनसः शान्तिः। (मनाची शांती) | ताम्। | षष्ठी-तत्पुरुषः। |
| ९. | शाखाच्छेदनेन | शाखायाः छेदनम्। (फांदीचे छेदन) | तेन। | षष्ठी-तत्पुरुषः। |
| १०. | आपत्काले | आपत्तेः कालः। (अकर्मक धातू) | तस्मिन्। | षष्ठी-तत्पुरुषः। |

| | | | | |
|---|---|---|---|---|
| ११. | परिव्राजकवेषधारी | i. परिव्राजकस्य वेषः। परिवाज्रकवेषः।<br>(बैराग्याचा वेष)<br>ii. परिव्राजकवेषं धारयति इति।<br>(बैराग्याचा वेष परिधान केलेला) | –<br><br>– | षष्ठी-तत्पुरुषः।<br><br>उपपद-तत्पुरुषः। |
| १२. | मनुजशब्दः। | मनुजस्य शब्दः।<br>(मनुष्याचा आवाज) | – | षष्ठी-तत्पुरुषः। |
| १३. | श्रुतिपथम् | श्रुतेः पन्थाः।<br>(ऐकण्याचा मार्ग) | तम्। | षष्ठी-तत्पुरुषः। |
| १४. | स्वरवेण | स्वस्य रवः।<br>(स्वतःचा आवाज) | तेन। | षष्ठी-तत्पुरुषः। |

## नञ् – तत्पुरुषः।

| क्र. | समस्तपदम् | विग्रहः | विभक्तिः | समासनाम |
|---|---|---|---|---|
| *१५. | असमर्थः | न समर्थः।<br>(समर्थ नसलेला) | – | नञ्-तत्पुरुषः। |

## उपपद – तत्पुरुषः।

| क्र. | समस्तपदम् | विग्रहः | विभक्तिः | समासनाम |
|---|---|---|---|---|
| *१६. | धनुर्धारी | धनुः धारयति इति।<br>(धनुष्य धारण करणारा) | – | उपपद-तत्पुरुषः। |

## कर्मधारयः।

| क्र. | समस्तपदम् | विग्रहः | विभक्तिः | समासनाम |
|---|---|---|---|---|
| *१७. | निबिडारण्यम् | निबिडम् अरण्यम्।<br>(घनदाट अरण्य) | – | विशेषण-पूर्वपद-कर्मधारयः। |

| | | | | |
|---|---|---|---|---|
| *१८. | निपुणयोद्धा | निपुण: योद्धा।<br>(निपुण योद्धा) | – | विशेषण-पूर्वपद-कर्मधारय:। |
| *१९. | महापत्ति: | महती आपत्ति:।<br>(मोठे संकट) | – | विशेषण-पूर्वपद-कर्मधारय:। |
| २०. | चण्डातपेन | चण्ड: आतप:।<br>(तीव्र सूर्यप्रकाश) | तेन। | विशेषण-पूर्वपद-कर्मधारय:। |
| २१. | दीर्घसमय: | दीर्घ: समय:।<br>(दीर्घ काळ) | – | विशेषण-पूर्वपद-कर्मधारय:। |
| २२. | विशालवृक्षस्य | विशाल: वृक्ष:।<br>(विशाल वृक्ष) | तस्य। | विशेषण-पूर्वपद-कर्मधारय:। |
| २३. | सर्वाङ्गम् | सर्वम् अङ्गम्।<br>(संपूर्ण अंग) | – | विशेषण-पूर्वपद-कर्मधारय:। |

**बहुव्रीहि:।**

| क्र. | समस्तपदम् | विग्रह: | विभक्ति: | समासनाम |
|---|---|---|---|---|
| *२४. | निराश्रया: | निर्गत: आश्रय: येभ्य:ते।<br>(ज्याचा आश्रय हरपला आहे तो) | – | प्रादि बहुव्रीहि:। |
| २५. | कन्दुकाकारा: | कन्दुका: इव आकारा: येषां ते।<br>(चेंडूसारखा आकार) | – | समानाधिकरण बहुव्रीहि:। |